काचमलं, क्ली, (काचस्य क्षारमृत्तिकाया मलमिव ।) काचलवणम् । इति राजनिर्घण्टः ॥

काचलवणं, क्ली, (काचात् क्षारमृत्तिकाया जातं लवणम् ।) लवणविशेषः । कालालुण इति भाषा । तत्पर्य्यायः । नीलम् २ काचोद्भवम् ३ काचम् ४ नीलकम् ५ काचसम्भवम् ६ काचसौवर्च्चलम् ७ कृष्णलवणम् ८ पाक्यजम् ९ काचोत्थम् १० हयगन्धम् ११ कालवणम् १२ कुरुविन्दम् १३ काचमलम् १४ कृत्रिमम् १५ । अस्य गुणाः । रुचिकारित्वम् । ईषत्क्षारत्वम् । पित्तवृद्धिकारित्वम् । दाहदायित्वम् । कफवातगुल्मशूलनाशित्वम् । अग्निदीपनत्वञ्च । इति राजनिर्घण्टः ॥

काचसम्भवं, क्ली, (सम्भवत्यस्मादिति सम्भवः । काचः क्षारमृत्तिका सम्भव उत्पत्तिस्थानमस्य ।) काचलवणम् ॥ इति राजनिर्घण्टः ॥

काचसौवर्च्चलं, क्ली, (काचस्थानिकं सौवर्च्चलं लवणम् ।) काचलवणम् । इति राजनिर्घण्टः ॥

काचस्थाली, स्त्री, (काचस्य क्षारस्य स्थालीव ।) मलोत्कटावृक्षः । पारुल गाछ इति भाषा । इत्यमरः । २ । ४ । ५४ ॥ (अस्याः पर्य्यायो यथा—

"पाटलिः पाटला मोघा मधुदूती फलेरुहा ।
कृष्णवृन्ता कुवेराक्षी कालस्थाल्यलिवल्लभा ॥
ताम्रपुष्पी च कथिता परा स्यात् पाटला सिता ।
मुष्कको मोक्षकोघण्टा पाटलिः काष्ठपाटला" ॥
कालस्थालीत्यत्र काचस्थालीत्येके ।

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणादयोऽस्याः पाटलिशब्दे ज्ञेयाः ॥ काचनिर्म्मिता स्थाली ।) काचपात्रम् ॥

काचिघः, पुं, (कचते दीप्यते इति बाहुलकात् इन् । काचिं कान्तिं हन्ति गच्छति । हन गतौ + ड । पृषोदरादित्वात् ह्रस्व घः ।) काञ्चनम् । हेमखड्गः । हिमड़ा । इति भाषा । मूषिकः । इति मेदिनी ॥

काचित्, अ (पाणिनिमते पदद्वयमेतत् । मुग्धबोधमते "किमःश्चन्ताश्चिचनौ" इति का + चित्प्रत्ययः ।) काचन । कापि स्त्री । इति व्याकरणम् । (यथा, पदाङ्कदूते १ ।

"गोपीभर्त्तुर्विरहविधुरा काचिदिन्दीवराक्षी
उन्मत्तेव स्खलितकवरी निःश्वसन्ती विशालम्" ॥)

काचितं, त्रि, (कच्यते बध्यतेऽसौ । कच् + णिच् + कर्म्मणि क्तः ।) शिक्यितम् । शिक्यारोपितवस्तु । इत्यमरः । ३ । १ । ८९ ॥ शिकाय तोला द्रव्य इति भाषा ॥

काचिमः, पुं, (कच बन्धे + णिच् + इमन् ।) देवकुलोद्भववृक्षः । तत्पर्य्यायः । भक्षकः २ । इति त्रिकाण्डशेषः ॥

काञ्चनं, क्ली, (काञ्चते दीप्यते इति । कचि ड दीप्तौ + ल्युः ।) स्वर्णम् । इत्यमरः । २ । ९ । ९५ ॥ (यथा मनुः । २ । २३९ ।

"अमिध्यादपि सद्वृत्तममेध्यादपि काञ्चनम्" ॥)

पद्मकेशरम् । इति मेदिनी ॥ धनम् । नागकेशरपुष्पम् । इति राजनिर्घण्टः ॥ (भावे ल्युट् । दीप्तिः । काञ्चनमये त्रि, यथा, मनुः । ५ । ११२ ।

"निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुध्यति" ॥)

काञ्चनः, पुं, (काञ्चते दीप्यते इति कर्त्तरि ल्युः ।) स्वनामख्यातपुष्पवृक्षविशेषः । रक्तश्वेतभेदेन स द्विविधः । आद्यस्य पर्य्यायः । रक्तपुष्पः २ कोविदारः ३ युगमपत्रः ४ कुद्दालः ५ ॥ द्वितीयस्य पर्य्यायः । काञ्चनालः २ कर्व्वुदारः ३ पाकारिः ४ । इति रत्नमाला ॥ अस्य राजनिर्घण्टोक्तगुणपर्य्यायौ कोविदारशब्दे द्रष्टव्यौ ॥ * ॥ चम्पकः । नागकेशरः । उदुम्बरः । धुस्तूरः । इति मेदिनी ॥ (पुरूरवसो वंश उद्भवस्य भीमस्य पुत्त्रः । यथा, भागवते । ९ । १५ । ३ ।

"भीमस्तु विजयस्याथ काञ्चनो होत्रकस्ततः" ॥)

काञ्चनकं, क्ली, (काञ्चन + संज्ञायां कन् ।) हरितालम् । इति राजनिर्घण्टः ॥

काञ्चनकः, पुं, (काञ्चन + स्वार्थे कन् ।) कोविदारवृक्षः । इति वैद्यकम् ॥

("काञ्चनारः काञ्चनको गण्डारिः शोणपुष्पकः" । इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणादयोऽस्य कोविदारशब्दे ज्ञेयाः ॥)

काञ्चनकदली, स्त्री, (काञ्चनवर्णा कदली ।) सुवर्णकदली । इति राजनिर्घण्टः । चाँपाकला इति भाषा ॥

काञ्चनकारिणी, स्त्री, (काञ्चनं बद्धमूलेन बन्धनं करोति । काञ्चन + कृ + णिनिः । स्त्रियां ङीप् ।) शतमूली । इति शब्दचन्द्रिका । (शतावरी शब्दे ऽस्या विवरणं बोद्धव्यम् ॥)

काञ्चनक्षीरी, स्त्री, (काञ्चनमिव क्षीरमस्याः । गौरादित्वात् ङीष् । काञ्चनवृक्षस्य क्षीरमिव क्षीरमस्य वा ।) क्षीरिणीलता । इति राजनिर्घण्टः ॥

काञ्चनगिरिः, पुं, (काञ्चनमयो गिरिः । शाकपार्थिवादित्वात् समासः ।) सुमेरुपर्व्वतः । इति हेमचन्द्रः । (यथा भागवते । ५ । १६ । २८ ।

"जठरदेवकूटौ मेरुं पूर्व्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुङ्गौ भवतः । एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ एवमुत्तरतस्त्रिशृङ्गमकरौ अष्टाभिरेतैः परिसृतो ऽग्निरिव परितश्चकास्ति काञ्चनगिरिः" ॥ दानाय कृतः सुवर्णपर्व्वतः ॥)

काञ्चनपुष्पकं, क्ली, (काञ्चनमिव पीतं पुष्पं यस्य । काञ्चनपुष्प + कप् ।) आढक्यवृक्षः । इति राजनिर्घण्टः ॥

काञ्चनपुष्पी, स्त्री, (काञ्चनमिव पुष्पं यस्याः ङीप् ।) गणिकारीवृक्षः । इति राजनिर्घण्टः ॥ (गणिकारिका शब्दे ऽस्या विशेषो ज्ञातव्यः ॥)

काञ्चनारः, पुं, (काञ्चनं वर्णं ऋच्छति पुष्पैः । काञ्चन + ऋ + अण् ।) कोविदारवृक्षः । इति राजनिर्घण्टः ॥ कचनार इति हिन्दी भाषा ॥ ("काञ्चनारः काञ्चनकः" इत्यादि पर्य्यायाः काञ्चनकशब्दे गुणाश्च कोविदारशब्दे ज्ञातव्याः ॥ व्यवह्रियते यथ तद्यथा,—

"काञ्चनारत्वचः क्वाथः शुण्ठीचूर्णेन नाशयेत् ।
गण्डमालान्तथा क्वाथः क्षौद्रेण वरुणत्वचः" ॥

इति मध्यखण्डे २ अः शार्ङ्गधरेणोक्तम् ॥)

काञ्चनालः, पुं, (काञ्चनं काञ्चनवर्णं अलति । काञ्चन + अल + अण् ।) कोविदारवृक्षः । इति शब्दरत्नावली । (काञ्चनारशब्देऽस्य गुणादयो ज्ञेयाः ॥ अस्य विवृतिः कोविदारशब्दे द्रष्टव्या ॥)

काञ्चनाह्वयः, पुं, (काञ्चनं स्वर्णं आह्वयते स्पर्द्धते स्वभासा । आ + ह्वे + कः । काञ्चन इत्याह्वयो नाम यस्य वा ।) नागकेशरवृक्षः । इत्यमरः । २ । ४ । ६५ ॥

काञ्चनी, स्त्री, (काञ्चते दीप्यते अनया । करणे ल्युट् ङीप् ।) हरिद्रा । इति मेदिनी ॥ स्वर्णक्षीरीवृक्षः । गोरोचना । इति राजनिर्घण्टः ॥

काञ्चनीया, स्त्री, (काञ्चनाय हिता । काञ्चन + छः टाप् च ।) गोरोचना । इति राजनिर्घण्टः ॥

काञ्चिः, स्त्री, (काञ्चते इति "सर्व्वधातुभ्य इन्" । उणां ४ । ११७ । इति इन् ।) काञ्ची । इत्युणादिकोषः ॥ (यथा आर्य्यासप्तशती ६९३ ।

"हृतकाञ्चिवल्लिबन्धोत्तरजघनादपरभोगसुभगायाः ।
उल्लसति रोमराजिः स्तनशम्भोर्गरलरेखेव" ॥)

काञ्चिकं, क्ली, (काञ्चि + संज्ञायां कन् ।) काञ्जिकम् । इति हेमचन्द्रः ॥

काञ्ची, स्त्री, (काञ्चि, "कृदिकारादक्तिनः" वा ङीष् ।) स्त्रीकट्याभरणम् । चन्द्रहार गोट् इत्यादि भाषा । तत्पर्य्यायः ॥ मेखला २ सप्तकी ३ रसना ४ सारसनम् ५ । इत्यमरः । २ । ६ । १०८ ॥ काञ्चिः ६ रशना ७ कक्षा ८ कक्ष्या ९ सप्तका १० सारशनम् ११ रसनम् १२ बन्धनम् १३ । इति शब्दरत्नावली ॥

("वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः" ॥ इति मेघदूते । ३० ॥) केचित्तु

एकयष्टिर्भवेत् काञ्ची मेखला त्वष्टयष्टिका ।
रसना षोडश ज्ञेया कलापः पञ्चविंशकः" ॥

इति पठन्ति इह त्वभेदात् पर्य्यायता । इति तट्टीका ॥ मोक्षदसप्तपुर्य्यन्तर्गतपुरीविशेषः । इति मेदिनी ॥ (यदुक्तम् ।

"अयोध्या मथुरा माया काशी काञ्ची अवन्तिका ।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः" ॥

इयं हि कूर्म्मविभागे दक्षिणस्यां दिशि स्थिते द्राविड़देशे अनुमीयते ॥) गुञ्जा । इति विश्वः ॥

काञ्चीपदं, क्ली, (काञ्च्याः पदं स्थानम् ।) जघनम् । इति हलायुधहेमचन्द्रौ ॥

काञ्जिकं, क्ली, (अन्ज + धात्वर्थनिर्द्देशे ण्वुल् + टाप् अत इत्वम् । अञ्जिका । कु कुत्सिता अञ्जिका व्यक्तिर्यस्य कोः कादेशः ।) वारिपर्य्युषितान्नाम्लजलम् । काँजी इति भाषा । तत्पर्य्यायः । आरनालकम् २ सौवीरम् ३ कुल्माषम् ४ अभिषुतम् ५ अवन्तिसोमम् ६ धान्याम्लम् ७ कुञ्जलम् ८ । इत्यमरः । २।९।३९॥ कुल्माषम् ९ कुल्माषाभिषुतम् १० काञ्चिकम् ११ काञ्जीकम् १२ काञ्जिका १३ कञ्जिकम् १४ काञ्जी १५ भक्तवारि १६ धान्यमूलम् १७ धान्ययोनि १८ तुषाम्बु १९ । इति तट्टीका ॥ महारसम् २०